(ङ) यस्यामापः परिचराः समानीहोरात्रे अप्रमादं क्षरन्ति ।
सा नो भूमिर्भूरिधारा पयो दुहामथो उक्षतु वर्चसा ।।

(च) यस्ते गन्धः पृथिवी संबभूव यं बिभ्रत्योषधयो यमापः ।
यं गन्धर्वा अप्सरसश्च भेजिरे तेन मा सुरभिं कृणु ।
मा नो द्विक्षत कश्चन ।।

**5.** निम्नलिखितेषु मन्त्र**द्वय**स्य विशदव्याख्या करणीया – **2×8=16**

(क) हिरण्यमयेन पात्रेण सत्यस्यापिहितं मुखम् ।
तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ।।

(ख) अग्ने नय सुपथा रायेऽस्मान् विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम ।।

(ग) यस्मिन् सर्वाणि भूतान्यात्मैवाभूद् विजानतः ।
तत्र को मोहः कः शोकः एकत्वमनुपश्यतः ।।



**Roll No. .......................** **Exam Code : J-21**

# Subject Code—52786

## M. A. EXAMINATION

(Main) (Batch 2020 Onwards)

(First Semester)

SANSKRIT

MAST-101

Paper–A

Samhita Upanisat Cha

*Time : 3 Hours* *Maximum Marks :* 80

**नोट** : सर्वे प्रश्नाः समाधेयाः ।

**1.** अधोलिखितानां प्रश्नानां संक्षिप्तोत्तरं लिखत – **4×4=16**

(क) विष्णुसूक्तम् आश्रित्य विष्णोः स्वरूपं निरूपयत ।

(ख) नासदीयसूक्तस्य महत्त्वं प्रतिपादयत ।

(ग) शिवसंकल्पसूक्तमधिकृत्य मनसः स्वरूपं प्रतिपादयत ।

(घ) अग्निसूक्तस्य सारं लिखत ।

**2.** अधोलिखितेषु पारम्परिक्या आधुनिक्या आलोचनात्मकपद्धत्या च मन्त्र**द्वयं** संस्कृतमाध्यमेन व्याख्येयम्: – **2×8=16**

(क) हिरण्यहस्तो असुरः सुनीथः सुमृलीकः स्ववाँ यात्वर्वाङ् ।
अपसेधन्नरक्षसो यातुधानानस्थाद्देवः प्रतिदोषं गृणानः ।।

(ख) यो जात एव प्रथमो मनस्वान्देवो देवान्क्रतुना पर्यभूषत् ।
यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इन्द्रः ।।

(ग) अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम् ।
होतारं रत्नधातमम् ।।

**3.** (क) निम्नलिखितेषु पारम्परिक्या आधुनिक्या आलोचनात्मकपद्धत्या च मन्त्र**द्वयं** व्याख्येयम् – **2×5=10**

(i) चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत ।।

(ii) अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः ।
अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा ।।

(iii) हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ।।

(ख) हिरण्यगर्भसूक्तस्य **अथवा** वाक्सूक्तस्य सारं लिखत । **1×6=6**

**4.** पारम्परिक्या आधुनिक्या पद्धतिम् अनुसृत्य मन्त्र**चतुष्टयं** व्याख्येयम् – **4×4=16**

(क) येन कर्मण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः ।
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसंकल्पमस्तु ।।

(ख) येनेदं भूतं भुवनं भविष्यत् परिगृहीतममृतेन सर्वम् ।
येन यज्ञस्तायते सप्तहोता तन्मे मनः शिव-संकल्पमस्तु ।।

(ग) यस्यां पूर्वे पूर्वजना विचक्रिरे यस्यां देवा असुरा-नभ्यवर्तयन् ।
गवामश्वानां वयसश्च विष्ठा भगं वर्चः पृथिवी नो दधातु ।।

(घ) असंबाधं मध्यतो मानवानां यस्या उद्वतः प्रवतः समं बहु ।
नानावीर्या ओषधीर्या बिभर्ति पृथिवी नः प्रथतां राध्यतां नः ।।